॥ हनुमत् पञ्चरत्न स्तोत्रम् ॥

शं शं शं सिद्धनाथं प्रणमति चरणं वायुपुत्रं च रौद्रं,
वं वं वं विश्वरूपं ह ह ह ह हसितं गर्जितं मेघक्षत्रम् ।
तं तं त्रैलोक्यनाथं तपति दिनकरं तं त्रिनेत्र स्वरूपं,
कं कं कन्दर्पवश्यं कमलमनहरं शाकिनीकालरूपम् ॥ ॥ १ ॥

रं रं रं रामदूतं रणगजदमितं रावणच्छेददक्षं,
बं बं बं बालरूपं नतगिरिचरणं कम्पितं सूर्यबिम्बम् ।
मं मं मं मंन्त्रसिद्धिं कपिकुलतिलकं मर्दनं शाकिनीनां,
हुं हूं हुं हुंकारबीजं हनति हनुमतं हन्यते शत्रुसैन्यम् ॥ ॥ २ ॥

दं दं दं दीर्घरूपं धरकरशिखरं पातितं मेघनाथम् ,
ॐ ॐ उच्चाटितं वै सकलभुवतलं योगिनी वृन्दरूपम् ।
क्षं क्षं क्षं क्षिप्रवेगं क्रमति च जलधिं ज्वालितं रक्षदुर्गं,
क्षें क्षें क्षें क्षेमतत्वं दनुरुहकुलं मुच्यते बिम्बकारम् ॥ ॥ ३ ॥

कं कं कं कालदुष्टं जलनिधितरणं राक्षसानां विनाशे,
दक्षं श्रेष्ठं कवीनां त्रिभुवनचरतां प्राणिनां प्राणरूपम् ।
ह्रां ह्रां ह्रां ह्रस्ततत्वं त्रिभुवनरचितं दैवतं सर्वभूते,
देवानां च त्रयाणां फणिभुवनधरं व्यापकं वायुरूपम् ॥ ॥ ४ ॥

त्वं त्वं त्वं वेदतत्वं बहुरुचयजुषां साम चाऽथर्वरूपं,
कं कं कं कन्दनं त्वं ननु कमलतजे राक्षसान् रौद्ररूपान् ।
खं खं खं खड्गहस्तं झटिति भुवितले त्रोटितं नागपाशं,
ॐ ॐ ॐ ऊँकाररूपं त्रिभुवनपठितं वेदमन्त्राधिमन्त्रम् ॥ ५ ॥

सङ्ग्रामे शत्रुमध्ये जलनिधितरणे व्याघ्रसिंहे च सर्पे
राजद्वारे च मार्गे गिरिगुहविवरे चोषरे कन्दरे वा ।
भूतप्रेतादियुक्ते ग्रहगणविषये शाकिनीडाकिनीनां,
देशे विस्फोटकानां ज्वरवमनशिर:पीडने नाशकस्त्वम् ॥ ॥ ६ ॥

॥ इति भगवत्पादानां रामभुजङ्गत: हनुमत् पंचरत्न स्तोत्रम् संपूर्णम् ॥

॥ हनुमत् पञ्चरत्न स्तोत्रम् - २ ॥

वीताखिल-विषयेच्छं जातानन्दा श्रुपुलकमत्यच्छं ।
सीतापति दूताख्यं वातात्मजमद्य भावये हृद्यम् ॥ ॥१॥

तरुणा रुण-मुखकमलं करुणारस-पूर-पूरितापागंम् ।
संजीवनमाशासे मञ्जुल-महिमानं-अन्जनाभाग्यम् ॥ ॥ २ ॥

शंबरवैरि-शरातिग-मम्बुजदल-विपुललोचनोदारं ।
कंबुगलमनिलदिष्टं बिम्बज्वलितोष्टमेकमालम्बे ॥ ॥ ३ ॥

दूरीकृतसीतार्तिः प्रकटीकृतराम-वैभवस्फूर्तिः।
दारित-दशमुख-कीर्तिः पुरतो मम भातु हनुमतो मूर्तिः ॥ ॥ ४ ॥

वानर-निकराध्यक्षं दानवकुल-कुमुदरविकर-सदृशम् ।
दीनजनावनदीक्षं पवन-तपः पाकपुञ्जमद्राक्षम् ॥ ॥ ५ ॥

एतत् पवनसुतस्य स्तोत्रं यः पठति पञ्चरत्नाख्यं ।
चिरमिह निखिलान् भोगान् भुक्त्वा श्रीरामभक्तिमान् भवति ॥ ६ ॥

॥ इति श्री शंकराचार्य विरचितं हनुमत् पञ्चरत्नं संपूर्णम् ॥